**SET-4**

**Series SGN**

कोड नं.
**Code No.** **49**

रोल नं.
Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयो : होरात्रयम्* *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* *अधिकतम अंक : 100*

*Time allowed : 3 hours* *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*
*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*15 अङ्काः*

**1.** अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following **two** passages and answer the given questions in Sanskrit.

(क) **प्रथमः अनुच्छेदः**

प्राचीनविश्वे यावन्त्योऽपि सभ्यताः आसन्, ताः प्रायः नदीतटेषु विकसिताः अभूवन् । यथा बृहत्तरभारते सिन्धुनदीतटवर्तिक्षेत्रेषु सिन्धुघाटीसभ्यता, मिस्रदेशे नीलनदीतीरे मिस्रीसभ्यता, ईराकदेशे दज़ला-फ़रातेति नदीद्वयमध्ये मैसोपोटामियासभ्यता, चीनदेशे च पीलीनदीतटे चीनीसभ्यता चिरं प्रचलिताः । परं कालप्रभावात् प्राकृतिककारणाच्च शनैः शनैः एताः विनष्टाः । नदीतटेषु एतासां प्राचीनसभ्यतानां विकासकारणमिदं यत् मानवीयवसतीनां स्थापनार्थं याः मौलिकाः आवश्यकताः भवन्ति, तासाम् आपूर्तिः नदीतटेषु सुलभा आसीत् । यथा – पेयार्थं, क्षेत्राणां च सेचनार्थं जलम्, उर्वरकभूमेः प्रचुरता, नौपरिवहनार्थं च नदीजल-प्रवाहः ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) नदीतटेषु काः विकसिताः अभूवन् ?

(ii) नदीद्वयमध्ये का विकसिता ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2

नदीतटेषु प्राचीनसभ्यतानां विकासकारणं किं किम् ?

(स) यथानिर्देशमुत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4 = 2$

(i) 'आधुनिक' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(ii) 'अभूवन्' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'सरित्' इत्यर्थे कः पर्यायशब्दः अत्र प्रयुक्तः ?

(iv) 'तासाम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ख) **द्वितीयः अनुच्छेदः**

साहित्यं द्विधा भवति — मनोरञ्जनात्मकम् उपदेशात्मकं च । उपदेशात्मके साहित्ये मानवीयजीवनकृते उपयोगिनी शिक्षा अवश्यं भवति । किंचन साहित्यम् एतादृक् अपि वर्तते यत् मनोरञ्जनेन साकं गभीरां शिक्षामपि ददाति । यथा — विष्णुशर्मविरचिते पञ्चतन्त्रे मकरवानरकथा । कश्चन वानरः प्रतिदिनं मकराय मधुराणि जम्बूफलानि ददाति स्म । मकरोऽपि मकर्यै । परं मकरी वानरस्य हृदयं खादितुम् ऐच्छत् । दुष्टेन मकरेण निमन्त्रितः वानरः तस्य पृष्ठम् आरुह्य नदीमध्ये गतः । तदा वानरेण ज्ञातं यत् मकरस्तु तं हन्तुम् इच्छति । स्वबुद्धिचातुर्येण वानरः आत्मानं रक्षितवान् । कथेयम् अस्मान् शिक्षयति यत् अविश्वस्ते विश्वासो नैव करणीयः । यः अतितरां विश्वासी स्यात् तदुपरि अपि अन्धविश्वासो न कर्तव्यः ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) मकरवानरकथा कुत्र वर्तते ?

(ii) मकराय जम्बूफलानि कः ददाति स्म ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

मकरवानरकथा अस्मान् किं शिक्षयति ?

(स) यथानिर्देशमुत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) ‘इच्छति’ इति क्रियापदस्य कर्तृपदं किम् ?

(ii) ‘गभीराम्’ इत्यस्य विशेष्यपदं किम् ?

(iii) ‘तस्य’ इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) ‘कटूनि’ इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit

*15 अङ्काः*

**2.** मञ्जूषातः उचितसंकेतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत ।

मञ्जूषा से उचित संकेत लेकर निम्नलिखित कथा को पूर्ण करके पुनः लिखिए ।

Complete and rewrite the following story, with the help of the words given in the box below. *1×10=10*

**कथा**

पुरा गोदावरीतटे एकः विशालः (i) __________ आसीत् । तत्र विविधाः (ii) __________ नीडनिर्माणं कृत्वा वसन्ति स्म । प्रातः (iii) __________ ते भोजनार्थं गत्वा रात्रौ (iv) _____________ स्म । अत्रागत्य च स्वनीडेषु रात्रिं यापयन्ति स्म । कदाचन कश्चन (v) __________ तत्र आगत्य बहून् (vi) __________ विकीर्य जालं (vii) __________ स्वयं च प्रच्छन्नो भूत्वा कपोतानाम् आगमनस्य (viii) __________ अकरोत् । अत्रान्तरे, सायं चित्रग्रीवनामा कश्चन (ix) _______________ स्वगणेन साकं तत्र समागतः । तण्डुलकणान् (x) ______________ चित्रग्रीवः चिन्तितवान् यत् निर्जनवने तण्डुलकणानां प्रसारणं केन कृतं स्यात् ?

**मञ्जूषा**

| |
|---|
| दृष्ट्वा, कपोतराजः, वटवृक्षः, प्रतीक्षाम्, तण्डुलकणान्, उत्थाय, प्रत्यावर्तन्ते, प्रासारयत्, खगाः, व्याधः । |

**3.** मञ्जूषातः पदानि चित्वा **'गङ्गासागरमेलकम्'** इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत ।

मञ्जूषा से पद चुनकर **'गङ्गासागरमेलकम्'** इस विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on **'गङ्गासागरमेलकम्'** with the help of the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| हिमालयात्, भगीरथेन, प्रत्येकं वर्षस्य, बंगालसागरे, सुन्दरवने, मकरसंक्रान्तिपर्वणि, लक्षलक्षाधिकाः, निर्जनद्वीपम्, कोलकातापार्श्वे, विलीना, गङ्गा, समानीता, जैनुअरीमासे । |

## खण्डः ग (SECTION C)

## पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च

## पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

## Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50 अङ्काः*

**4.** अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेनोत्तरत ।

निम्नलिखित पद्य, गद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following verse, prose and drama passages and answer the given questions in Sanskrit.

(क) **पद्यम्**

तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ।।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) कौत्सः कं प्रपेदे ?

(ii) कौत्सः कस्य शिष्यः आसीत् ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

राज्ञा यज्ञे किं वस्तु निःशेषतां नीतम् ?

(स) यथानिर्देशमुत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'यज्ञे' इत्यस्य किं पर्यायपदम् ?

(ii) 'शिष्यः' इत्यस्य विलोमपदं किम् ?

(ख) **गद्यांश**:

एकस्मिन् दिने श्रीनायार: पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत् । नेत्रतीराद् विगलिता अश्रुधारा आर्द्रीकरोति स्म पत्रस्य अधिकाधिकं भागम् । इदानीमेव तस्य कार्यालयलिपिक: श्रीदास: प्रविशति । श्रीनायार: तमुक्तवान् – अधुना मम गमनसमय: समुपागत एव । मम दायित्वहस्तान्तरणपत्रकं सज्जीकुरु ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) क: पत्रं धृत्वा पठति स्म ?

(ii) पत्रं का आर्द्रीकरोति स्म ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*
श्रीनायार: कार्यालयलिपिकं किं सज्जीकर्तुम् आदिशत् ?

(स) यथानिर्देशमुत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'शोषयति' इत्यस्य विलोमपदं किम् ?

(ii) 'इदानीम्' इत्यस्य किं पर्यायपदम् ?

(ग) **नाट्यांश**:

*बटव:* — भो भो: ! किं प्रयोजनोऽयमश्व: परिवृत: पर्यटति ?

*लव:* — (सस्पृहमात्मगतम्) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वल: सर्वक्षत्रपरिभावी महान् उत्कर्षनिकष: । (नेपथ्ये)

योऽयमश्व: पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विष: ।।

**प्रश्ना:**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) सप्तलोकैकवीर: क: ?

(ii) परिवृत: क: पर्यटति ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*
अयम् अश्व: कस्य अस्ति ?

(स) यथानिर्देशमुत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×2=2*
(i) 'रावण' इत्यर्थे किं पर्यायपदम् ?
(ii) 'पराजयिनाम्' इत्यस्य विलोमपदं किम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान करके लिखिए ।
Match the words with their meanings and rewrite the same. $\frac{1}{2} \times 4=2$

| | **शब्दा:** | | **अर्था:** |
|---|---|---|---|
| (अ) | उष्णरश्मि: | (i) | अधुना |
| (ब) | अजस्रम् | (ii) | आम्रम् |
| (स) | रसाल: | (iii) | सततम् |
| (द) | साम्प्रतम् | (iv) | सूर्य: |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।
रेखांकित पदों के आधार पर प्रश्न-निर्माण कीजिए ।
Frame questions on the basis of the underlined words. *1×4=4*
(i) प्रीतहृदय: चन्द्रापीड: स्वभवनम् आजगाम ।
(ii) सहसा विदधीत न क्रियाम् ।
(iii) बुद्धियुक्तो जहातीह सुकृत-दुष्कृते ।
(iv) अये, शिष्टानध्याय इति खेलतां बटूनां कोलाहल: ।

**7.** अधोलिखित**भावार्थयो**: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा पुनर्लिखत ।
निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके पुन: लिखिए ।
Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same. $\frac{1}{2} \times 12=6$

(अ) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद् धनम् ।।

**भावार्थ:**
इह संसारे यत् किमपि ________ अस्ति, तत्सर्वम् ईश्वरेण ________ । त्यागपूर्वकम् अस्य _______ भोगं कुरुत । _______ अपि _______ प्रति लोलुप: मा _______ ।

(ब) अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।
रमते न मरालस्य मानसं मानसं विना ।।

**भावार्थः**

यद्यपि इह संसारे ________ सरोवरं ________ अस्ति, परन्तु ________ मानसं मानसरोवरं विना ________ आनन्दं न ________ । मानसरोवरे एव स ________ ।

**मञ्जूषा**

| |
|---|
| अन्यत्र, वस्तुजातम्, हंसस्य, सर्वत्र, कस्यचिद्, व्याप्तम्, कमलशोभितम्, संसारस्य, भव, धनम्, रमते, लभते । |

**8.** अधोलिखितयोः श्लोकयोः अन्वय**योः** रिक्तस्थानपूर्तिं कुरुत ।

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following prose-order-renderings of the **two** verses. $\frac{1}{2} \times 6 = 3$

(अ) समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।

**अन्वयः**

समाप्तविद्येन मया (i) ________ महर्षिः विज्ञापितः (ii) ________ स मे (iii) ________ अस्खलितोपचारां तां भक्तिमेव पुरस्तात् अगणयत् ।

(ब) न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ।।

**अन्वयः**

किञ्चिद् अपि न (i) ________ दुःखानि सौख्यैः (ii) ________ । यः हि यस्य प्रियः जनः तत् तस्य (iii) ________ द्रव्यम् ।

**9.** यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb. $\frac{1}{2} \times 4 = 2$

(i) शरद्घनं न अर्दति चातकः ।

(ii) केयूराणि न भूषयन्ति पुरुषम् ।

(ब) विशेषणपदं चिनुत ।

विशेषण पद चुनिए ।

Select the adjective. *1×2=2*

(i) पश्चात् पुच्छं वहति विपुलम् ।

(ii) वृणते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव सम्पद: ।

(स) अधोलिखितपङ्क्त्यो: रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ?

निम्नलिखित पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?

In the following lines for whom are the underlined pronouns used ? *1×2=2*

(i) कोऽपि शिववीरस्य विश्वासपत्रं तस्य एव पत्रमादाय प्रयाति ।

(ii) समुपस्थितयौवराज्याभिषेकं तं विनीततरं कर्तुमिच्छन् शुकनास: उवाच ।

(द) अधोलिखितपङ्क्तिभ्याम् 'अन्धकार:' तथा 'चञ्चल:' इति पदयो: समानार्थके पदे चित्वा लिखत ।

निम्नलिखित पंक्तियों में से 'अन्धकार:' तथा 'चञ्चल:' इन पदों के समानार्थक पद चुनकर लिखिए ।

Select and write the synonyms of the words 'अन्धकार:' and 'चञ्चल:' from the following lines. *1×2=2*

(i) निसर्गत एव अतिगहनं तम: यौवनप्रभवम् ।

(ii) स: चपल: कथं दृश्यते ?

(य) क: कं कथयति ?

कौन किसे कह रहा है ?

Who is saying this to whom ? *$\frac{1}{2}\times 4=2$*

(i) ननु मूर्खा: ! पठितमेव हि युष्माभिरपि तत्काण्डम् ।

(ii) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् ।

**10.** (अ) अधोलिखितलेखकानां कस्या: अपि **एकस्या:** रचनाया: नाम लिखत ।

निम्नलिखित लेखकों की किसी **एक** रचना का नाम लिखिए ।

Write the names of any **one** work of each of the following poets. *1×5=5*

भवभूति:, भारवि:, अम्बिकादत्तव्यास:, हृषीकेशभट्टाचार्य:, कालिदास: ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत ।

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए ।

Write the names of the authors of the following works. *1×5=5*

कादम्बरी, नीतिशतकम्, भामिनीविलास:, प्रबन्धपारिजात:, महाभारतम् ।

## खण्डः घ (SECTION D)
## छन्दोऽलङ्काराः
## छन्द एवम् अलङ्कार
## Metres and Figures of Speech

*20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।
प्रश्नों के उत्तर दीजिए ।
Answer the questions. *1×2=2*

(i) 'उत्तरम्' अत्र 'उ' वर्णः लघुः गुरुः वा ?

(ii) 'महर्षिः' अत्र को गणः ?

(ब) अधोलिखितपरिभाषाः पूरयत ।
निम्नलिखित परिभाषाओं को पूर्ण कीजिए ।
Complete the following definitions. *1×4=4*

(i) _________तभजा जगौ गः ।

(ii) ननमय _________मालिनी भोगिलोकैः ।

(iii) _________ वंशस्थमुदीरितं जरौ ।

(iv) सूर्याश्वैर्यदि _________ शार्दूलविक्रीडितम् ।

(स) अधोलिखितपङ्क्त्योः किं किं छन्दः ?
निम्नलिखित पंक्तियों में कौन-कौन-सा छन्द है ?
What is the metre in the following lines ? *1×2=2*

(i) पश्चात् पुच्छं वहति विपुलं तत्त्व धूनोत्यजस्रम् ।

(ii) मनसि वचसि काये पुण्यपीयूषपूर्णाः ।

(द) अधोलिखितयोर्मध्ये **एकस्य** छन्दसः उदाहरणं लिखत ।
निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए ।
Write an example of any **one** of the following metres. *2*

अनुष्टुप्, शिखरिणी ।

**12.** (अ) अधोलिखितयोर्मध्ये कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत ।
निम्नलिखित में से किसी **एक** शब्दालङ्कार का उदाहरण सहित लक्षण लिखिए ।
Write the definition and example of any **one** of the following शब्दालङ्कार. *3*

यमकम्, अनुप्रासः ।

(ब) अधोलिखितयोर्मध्ये कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणम् उदाहरणं च लिखत ।

निम्नलिखित में से किसी **एक** अर्थालङ्कार का लक्षण एवम् उदाहरण लिखिए ।

Define and illustrate any **one** of the following अर्थालङ्कार. *3*

उपमा, अर्थान्तरन्यास: ।

(स) अधोलिखितपङ्क्त्यो: अलङ्कारं निर्दिशत ।

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए ।

Indicate the figure of speech in the following lines. *1×2=2*

(i) चन्द्रापीडस्ताभिरुपदेशवाग्भि: प्रक्षालित इव, उन्मीलित इव स्वभवनमाजगाम ।

(ii) यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मे: ।

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत ।

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए ।

Complete the following definitions of the **two** figures of speech. *1×2=2*

(i) भवेत् सम्भावनोत्प्रेक्षा __________ ।

(ii) अनुप्रास: शब्दसाम्यम् __________ ।